॥ श्रीः ॥

गोविन्दकविविरचितः

॥ गोपाललीलार्णवभाणः* ॥

॥ श्री गणेशाय नमः ॥

क्रीडानिर्भरमीलितेक्षणमतिश्वासोद्गमप्रस्फुर-
द्वक्षोजद्वितयं विलोलकबरी प्रच्छादितां सानतम् ।
वीथीषूत्रमितोत्तमाङ्गमनिशं सस्मेरवक्त्राम्बुजं
रत्यास्तत्सुरतान्तकान्तिरुचिरं भूयाद्वपुः श्रेयसे ॥

[नान्द्यन्ते]

सूत्रधारः - (सर्वतो विलोक्य) कथमिदानीं भगवतः श्रीनिवासस्यास्थानोत्सवदर्शनाय मिलिता एव पारिषदाः । तदेतान्नित्थं विज्ञापयामि । (अञ्जलिं बध्वा) भो ! भो ! एष भरताचार्यपुत्रोऽहमवहितोऽस्मि । भवदाराधने तदुच्यताम् । कस्मिन् उत्कण्ठिता तत्र भवतां चित्तवृत्तिः ।

सूत्रधारः - (कर्णं दत्वा) किं ब्रूथ ।

जामात्रादि जनस्य चेष्टितमभिव्यक्तीचकाराखिलं
यत्र श्री कमलापतेः सुचरितं सामार्थ्यमप्यात्मनः ।
गोविन्दाख्यसुहृत्कृतोऽयमुटके गोविन्दनामा कविः
प्राणैषीदधुनैवभाणमतुलं गोपाललीलार्णवम् ॥

तमेनं निरूपयति । (आकर्ण्य, स्वगतम्) कथमनेकेषु प्राचीनप्रबन्धेषु सत्स्वपि नवीनेऽस्मिन्भाणे चेतोऽनुबध्नाति आर्यमिश्रः । तदिदानीं ज्ञेयमस्माभिस्तेभ्योऽप्ययं सरस इति । उक्तं च कविनात्रैव --

कविता पावनितायाः सरसंत्वं तत्तदा ज्ञेयम् ।
नवरसविज्जनहृदयं भवति च सक्तं यदा नितराम् ॥

इति [प्रविश्य]

---

* B. 5321 / D. 4583. Sarasvati Mahal Library, Thanjavur.

सूत्रधारः - (अनुगृहीतोऽस्मीति परिक्रम्य नेपथ्याभिमुखमवलोक्य) प्रिये ! इतस्तावत् ।

[प्रविश्य]

नटी - एषाऽऽस्मि, को नियोगः, आज्ञापयतु भवान् ।

सूत्रधारः - प्रिये ! आज्ञापितोऽस्म्यार्यमिश्रैरभिनवगोपाललीलार्णवभाणाभिनयाय ।

नटी - आर्य कथमेनं सर्वजननिन्दागर्भितं द्रष्टुमिच्छन्त्यार्यमिश्राः ।

सूत्रधारः - उक्तमनेन कविना इदमेव मनसि कृत्वा -

निन्दागर्भोऽप्ययं भाणः सङ्ग्राह्यो विबुधैर्भवेत् ।
आदर्शस्त्यज्यते किं स्वमुखदोषप्रकाशकः ।।

नटी - युज्यतैतत् ।

सूत्रधारः - अस्त्यन्यत्किञ्चित्प्रष्टव्यम् ? सत्वरं पृच्छ ! ।

नटी - कथय । कथमनेन कविना स्वजनविरोधमप्यविगणय्य निःशङ्कमेवमभिहितम् ।

सूत्रधारः - किं मया कथनीयमस्ति ? उक्तमत्राप्यनेनैव कविना -

श्रुत्वैतद्येदमुदमनुभवन्त्यस्तु तेभ्यो नमो मे
ये कुर्वन्ति व्यथितहृदयास्सैव निन्दास्तु तेषाम् ।
अद्य श्वो वा मृतिरभिहितावश्यमासाद्य ते सा
भेतव्यं तत्किमिति परतो वाग्विलासे स्थितोऽपि ।।

इति ।

नटी - (सशिरःकम्पं) आर्य ! क ईदृशः कविर्यस्य लोकोत्तराधृतिः प्रगल्भता च ।

सूत्रधारः - गोविन्दकविरेव ।

नटी - (स्तब्धं तूर्ष्णीं तिष्ठति)

सूत्रधारः - (सप्रणयकोपं) अयि ! प्रेयसि !

तातो पश्य दिगन्तविश्रुतयशाः श्रीरङ्गवर्याभिधो
माता यस्य सरस्वती सुचरिता साध्वीनुतैस्तादृशोः ।

पित्रोः सूनुषु च त्रिषु प्रियतरो योऽपि स्वयं मध्यमः
किं वानागत एष ते श्रुतिपथं गोविन्दनामा कविः ।।

नटी - (सस्मरणं) आर्य ! प्रसीद ! प्रसीद ! कथमेष भवद्गुरुर्विश्रुतनामधेयो मम श्रुतिपथं नागच्छति । किन्तु व्यसनं नाम स्त्रियः वा पुरुषस्य वा स्मृतिभ्रंशकरम् । तदा कुलान्तरं गत्वान्तस्मृतोऽयं जनः ।

सूत्रधारः - (सोद्वेगं) अपि कथय ! किं ते व्यसनमागतमिदानीम् ? ।

नटी - आर्य ! यत्किल गृहारामवापिकायां विहर्तुमागतो राजहंसः काकैरपक्रमितः ।

सूत्रधारः - (विहस्य) काकैरितिमूर्कवाद एषः ।

काकानामपराधोऽत्र प्रतिकूले विधौ तु कः ।
आगत्य विहरे ज्ञाप्यामनुकूले विधौ प्रिये ।।

तदधुना दैवानुकूल्यसम्पादनापराधायार्यमिश्रान्वसन्तवर्णनेन ।

नटी - यथाज्ञापयत्वार्यः ।

सम्प्रति हि तनुजलविभवाः -

सरितप्रवहति पवनस्त्वत्ववनतिशीतोष्णः ।
तरुणीकुचतटवृत्तिः ह्यजनि च शीतं जगद्व्याप्तम् ।।

किञ्च -

एकोऽपि मलयपवनो-
मन्मथसचिवाधिकार दोषेण ।
सप्रियजनानुकूलः -
प्रवहति विघटितजनविषमश्च ।।

[नेपथ्ये]

श्रुत्वा गृहे कलकलं प्रविमूढचित्ता
मत्पाणियुग्मविधृतं स्वकरेण यत्नात् ।
आम्रेडितोक्तिवदनं प्रविमोचयित्वा
हा हाधुनैव निरगादपिता कथं मे ।।

सूत्रधारः - (आकर्ण्य) प्रिये ! समागतोऽयं प्रवाहकालिन्दीविपुलस्य गोपालस्य भूमिकामादाय तदावामप्यनन्तरकरणीयाय सज्जीभवावः

[इति निष्क्रान्तौ]

[प्रस्तावना]

[ततः प्रविशति यथा निर्दिष्टो गोपालः]

गोपालः - (दीर्घमुष्णं च निश्वस्य)

पीनस्निग्धखलीनकर्कशकुचद्वन्द्वं समालिङ्गितुं
स्कन्धादाशु नवोदितार्ककिरणछायं दुकूलाञ्चलम् ।
उद्युक्तस्त्वपनेतुमम्बुजदृशोर्यावद्धि गात्रान्तरे
दुर्दैवेन हि कारितः कलकलश्चोरं प्रवेश्यालये ।।

(सखेदं) हन्त -

उन्मुच्य कञ्चुकमुरोजयुगं निपीड्य
स्वाघ्राय वक्त्रमधरं मधुरं निपीय ।
पश्चाद्दुकूलमपनीय लभेहमिष्ट-
मेवं वृथाभिलषितैः क्षणदेव नीता ।।

(सोन्मादं)

कान्तेऽधुना तिमिरनिष्फलितेक्षणस्त्वां-
हस्तौ प्रसार्य कथमप्यहमस्मि लब्ध्वा ।
किं मां पुनः पुनरपि श्रम यस्य नाथं
मामैव मे हि सफली कुरु मे प्रयासम् ।।

(स्मृतिमधिगम्य) हन्त ! इदानीमेव खलु ! निर्गता प्रियतमा ।

(सकरुणं) हा प्रिये ! एवं विलपन्तमनाथं मां विहाय क्व गतासि ? कथं वा वर्तसे ?

[नेपथ्ये]

इच्छन्तो यजिर्नीं प्रभातसमये भृङ्गो रवे त्वां हृदि-
ध्यायत्येष नचास्यतेऽपि गणना चित्रं न चैतद्यतः ।
मेघोऽनन्यगतेश्चचातकशिशोर्गर्जन्कदाचिन्मुहुः-
द्वित्रान्वारिकणान्प्रयच्छति शनैश्चित्रं प्रभुत्वस्य तत् ।।

(आकर्ण्य, सोद्वेगं) हन्त ! सूचितमेतेनभास्वदुपालम्भेन कालिन्दीमदर्थं ताम्यतीति । (क्षणं . विचिन्त्य, दीर्घं निःश्वस्य) किमेतेनासम्भावितेन असुकरं खल्वेतत् ।

[पुनर्नेपथ्ये]

भृङ्गराज ! मा निराशो भव !

अयं समारोहति चण्डभानु-
र्निशाक्षये पूर्वमहीध्रशृङ्गम् ।
विवर्णभूता नलिनी निशायां
तवोपभोगाय भविष्यतीयम् ।।

(सहर्षं) सरोऽभितः परिभ्रमन्तं भृङ्गमाश्वासयता कालिन्दीसहोदरेण तरङ्गेणाहमायाश्वासितश्चास्मि ।

(श्रुतिमभिनीय, सर्वतोविलोक्य) कथं प्रभातप्रायेव रजनी ।

तथाहि -

भृङ्गावलिर्बहिरुपैति सरोजकोशा-
त्काकोपकण्ठमुपसर्पतिचक्रवाली ।
वृक्षेषु खं जनरुतैः प्र(ति)बोधितास्तु
कार्कास्वनैरभिरटन्ति विलम्ब्य काकाः ।।

किञ्च -

नाथस्यागमनं हि काकबिरुदैर्विज्ञाय हर्षाद्द्रुतं
कौसुम्भाम्बरभूषितेव च विभात्येषादिगैन्द्री पुनः ।
अन्या दक्षिणपश्चिमोत्तरदिशः सम्प्रेषितात्मप्रिया-
वैराग्यान्मलिनाम्बराः कृशतराः कान्ता इवाभान्ति च ।।

तदिदानीमेव द्रुततरं यथागतेन यथा बहिर्गच्छामि (इत्युत्थाय गृहप्राकारभित्तिमुल्लङ्घ्य वीथीं प्रविश्य, सौधानवलोक्य सहर्षखेदं)

मञ्चे स्वास्तृतचारुतूलशयने पर्यायदन्तैर्भुजै-
र्गाढालिङ्गनमाकलय्य वदनं वक्त्रेण संयोज्य च ।
वेणीवच्च मिथो दृढं सुनिवेश्योरून्स्वपन्ताविमौ-
स्त्रीपुंसौ तु विनाश्रमादलमतः पुण्यैकलभ्यं सुखम् ।।

(अन्यतो दृष्ट्वा, सकौतुकं)

स्विभानना परिहृताखिलभूषणा च
पीनस्तनी . . . द्रुतसुवर्णकान्तिः ।
व्यक्ता मुहुर्व्यवहिता च दृशोर्गवाक्षे
शं येव मन्मथघनस्य विभाति सैषा ।।

(केयमिति विचिन्त्य) ज्ञातमनया खलु ! कलानिधिदयितया चन्द्रिकया भवितव्यम् । दर्शनीया खल्वियं सर्वजननेत्रोत्सवदायिनी । हन्त ! कथमियं अदृश्या संवृता ? (इति सङ्कुचितलोचनं निपुणं निर्वर्ण्य, साश्चर्यं)

नीलाम्बरावृतभुजोदरपृष्ठमूर्धा-
सम्बद्धकच्छपुटवेशितशास्त्रमध्यः ।
कोऽयं नु साहसनिधिः स्वकरेण रज्जुं
धृत्वोन्नतादवतरत्यहहाशु सौधात् ।।

(पुनर्निरूप्य शातमयमस्मत्सुहृच्चकोरकः तदेनमुपसर्पामीति पदान्तरं गत्वा) सखे ! चकोरक ! किमेतत् ?

पाणौ प्रवितता रज्जुः कण्ठे वकुलमालिका ।
करपांसु निशितं शास्त्रं अधरे रदनव्रणः ।।

चकोरकः - किं ब्रवीषि ? मदन कदनात्सबहुमानप्रत्यागमनमिति । कया कृतवानसि मदनसङ्गरम् ।

(अनुवर्तते)